International Journal of Sanskrit Research 2020; 6(1): 204-208

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 204-208
© 2020 IJSR
www.anantaajournal.com
Received: 16-11-2019
Accepted: 20-12-2019

**Dr. Naveen Bhat**
Uppinapattana, Lecturer in Sanskrit, MIMS Banglore, Karnataka, India

**Corresponding Author:**
**Dr. Naveen Bhat**
Uppinapattana, Lecturer in Sanskrit, MIMS Banglore, Karnataka, India

# वेदेतिहासपुराणशास्त्रेषु नाट्यकलायाः प्रस्तावः

**Dr. Naveen Bhat**

## प्रस्तावना

"साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः" इति सुभाषितं, साहित्यस्य कलायाः च प्रामुख्यं प्रतिपादयति । तेषु कलासु नाट्यकला स्वकीयेन मनोरञ्जकत्त्वेन, रसोत्पादकेन गुणेन च सर्वेषां मनः कर्षति । नाट्यकलायाः शिक्षार्थं भरतमुनेः नाट्यशास्त्रं तदनुसृत्य रचिताः बहवः ग्रन्थाश्च प्रवृत्ताश्च सन्ति । परन्तु भारते देशे नाट्यकला कदा आरभ्य आराब्धा इति पृष्टः चेत् तस्योत्तरं दातुं क्लेषः एव भवति । अतः वेदेतिहासपुराणशास्त्रेषु नाट्यकलायाः प्रस्तावाः ये उपलभ्यन्ते ते नाट्यस्य प्राचीनत्त्वं, प्रमुखताञ्च प्रतिपादयन्ति । अतः अस्मिन् लेखे तान् उल्लेखान् अवलोकयाम ।

## १. वेदेषु नाट्यस्योल्लेख

प्रपञ्चे प्रायः सर्वेऽपि वेदस्य प्राचीनतमत्वम् आमनन्ति । तादृशेषु वेदेष्वपि नाट्यकलायाः उल्लेखाः ये उपलभ्यन्ते ते नाट्यकलायाः प्राचीनत्वं प्रकटीकुर्वन्ति । कानिचन वेदवाक्यानि पश्यामः यत्र नाट्यस्योल्लेखाः उपलभ्यन्ते –

- **"अधिपेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् ।**[1]

उषस् सूक्ते अयं मन्त्रः वर्तते । अस्यार्थम् "उषो देवता नृत्यन्ती योषिदिव आकर्षकं रूपं प्राप्नोति" इति विवृणोति सायणाचार्यः ।

- **पर्णा वाचमक्रतोऽप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।**[2]

अस्य मन्त्रस्य देवता ग्रावा अर्थात् सोमलतायाः रसान् निष्कासितुं उपयुज्यमानः अश्मा । तादृशाः ग्रावाणः कृष्णमृगवत् नर्तनं कुर्वन्तीति व्याख्यानं सायणभाष्ये वर्तते ।

- **संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ।**[3]

पूर्वेक्ते सूक्ते एव ग्रावासम्बद्धे अन्यस्मिन् मन्त्रे ग्रावाणः स्वस्य अङ्गुलीभिः सह नृत्यन्तीति उक्तम् ।

---

[1] ऋग्वेदः १-९२-४

[2] ऋग्वेदः १०-९४-५

[3] ऋग्वेदः १०-९४-४

- **प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ।**[4]

अयं मन्त्रः मृत्युदेवतासम्बद्धसूक्तात् सङ्ग्रहीतः । नृतये अर्थात् नर्तनाय हसाय अर्थात् हसनाय दीर्घायुष्यं प्राप्नुमः इत्यर्थः सायणमाधवैः विवृतः ।

- **नृत्ताय सूतङ्गीताय शैलूषन्धर्माय समाचरन्नरिष्ठायै भीमलन्नथर्वाय... ॥**[5]

मन्त्रोऽयं वाजसनेयसंहितायाः उद्धृतः । अत्र नृत्तं सङ्गीतं शैलूषः इति शब्दान् पश्यामः ।

- **यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्ये लबाः ।**[6]

अथर्ववेदस्य पृथिवीसूक्ते अयं मन्त्रः वर्तते । पृथिव्याः स्तुतौ "भूमावेव मर्त्याः गायन्ति नृत्यन्ति" इति वर्णितं दृश्यते । यद्यपि वेदादेव नाट्यकला उद्भूता इति भरतेनोक्ता तथापि चतुर्ष्वपि वेदेष्वपि नृत्यसम्बद्धा विषया नाट्यशास्त्रस्य रचनायाः प्रागेव प्रस्तापिता इति अनेन ज्ञायते । परन्तु सा नाट्यकला शास्त्रीया भवितुं भरतेन चतुर्वेदात् नाट्यवेदः रचितः इति वक्तुं शक्नुमः।

**२. रामायणमहाभारतयोः नाट्यस्योल्लेखः**

- रामायणेऽपि नृत्यसम्बद्धाः घटनाः बहुत्र दृश्यन्ते । अयोध्यकाण्डे रामस्य राज्याभिषेकसमये पौराः कथं सन्तोषमन्वभवन्निति वर्णनकाले अयं श्लोकः प्रदत्तः

नटनर्तकसङ्घानां गायकानां च गायताम् ।
मनः कर्णसुखावाचः शुश्रुवुश्च ततस्ततः ॥[7]इति ।

- बालकाण्डे द्वादशसर्गे उक्तो यत् दशरथः पुत्रार्थं यष्टुकामो भूत्वा वसिष्ठं विज्ञापयति । तदा वसिष्ठः अस्त्वित्युक्त्वा यज्ञार्थम् एतेषां साहाय्यं याचते –

गणकान् शिल्पिनश्चैव तथैव नटनर्तकान् ।
तथा शुचीन् शास्त्रविदः पुरुषान् स बहुश्रुतान् ॥[8] इति ।

अनेन ज्ञायते यत् रामायणकाले नाट्यविदाम् अपि शस्त्रवित्तुल्यगोरवम् आसीदिति ।

- ब्रह्मणानुगृहीतो वाल्मीकिः रामायणं रचयित्वा तत् कथं प्रसारयितव्यमिति विचिन्त्य स्वाश्रमस्थितौ कुशीलवौ[9] प्रति रामायणं गातुम् आदिदेश –

हास्यशृङ्गारकारुण्यरौद्रवीरभयानकैः ।
भीभत्स्यादिरसैर्युक्तं काव्यमेतदगायताम् ॥
तौ तु गान्धर्वतत्त्वज्ञौ स्थान मूर्छनकोविदौ ।
भ्रातरौ स्वरसम्पन्नौ गान्धर्वविदरूपिणौ ॥
रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ ।[10] इति ।

- एवमेव महाभारतेऽपि नृत्यसम्बद्धाः घटनाः दृश्यन्ते । अरण्यपर्वणि अर्जुनः भगवतः शङ्करात् पाशुपतास्त्रं प्राप्नोत् । तत्सन्दर्भे शक्रः स्वरथेन अर्जुनं स्वर्गमानेतुं मातलिम् आदिशति । मातलिना सह सजीवोऽर्जुनः दिवं गत्वा स्वपितृणा शक्रेण सह उपविशति । तदा अप्सरस्त्रियः नृत्यमकुर्वन्निति उक्तम् । तदेवम् -

घृताची मेनका रम्भा पूर्वचित्तिः स्वयंप्रभा ।
ऊर्वशी मिश्रकेशी च डुण्डुर्गौरी वरूथिनी ॥
गोपली सहजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्रलेखा सहा च मधुरस्वरा ॥
एताश्चान्याश्च ननृतुस्तत्र तत्र वराङ्गनाः ।
चित्तप्रमथने युक्ताः सिद्धानां पद्मलोचनाः ॥[11] इति ।

- **तत्रार्जुनः पुरन्दरेण अस्त्राणि प्राप्तवान् । तदा –**

ततः शक्रोऽब्रवीत्पार्थं कृतास्त्रं काल आगते ।
नृत्तं गीतं च कौन्तेय चित्रसेनादवाप्नुहि ॥
वादित्रं देवविहितं नृलोके यन्न विद्यते ।
तदर्जयस्व कौन्तेय श्रेयो वै ते भविष्यति ॥[12] इति ।

- अरण्यवासादनन्तरं पाण्डवाः विराटनगरं गतवन्तः । तत्र युधिष्ठिरः कङ्को नाम द्विजो भूत्वा वसति । भीमसेनः तत्र महानसे बल्लव नाम्ना वसन् पाककर्म कर्तुं निश्चिनोति । तत्समये युधिष्ठिरेण त्वं कथं वससि इति पृष्टोऽर्जुन एवमुत्तरं ददाति -

गीतं नृत्तं विचित्रं च वादित्रं विविधं तथा ।

---

4 ऋग्वेदः १०-१८-३

5 वाजसनेय माध्यन्दिन संहिता, अ-३० मं-६

6 अथर्ववेदः, काण्डः -१२ सूक्तम्-१ मंत्रः -४१

7 रामायणम् २-६-१४

8 रामायणम् १-१२-७

9 कुशीलवशब्दस्यार्थः वाचस्पत्ये एवं प्रदत्तः – १. कीर्तिसञ्चारके नटे २. गायके च ३. कुशलवयोः द्विवचनम् इत्यादि ।

10 रामायणम्- ४-९-१०

11 महाभारतम्-अरण्यपर्व-अ४४-श्लो२९-३१

12 महाभारतम्-अरण्यपर्व-अ४५-श्लो६,७

शिक्षयिष्याम्यहं राजन् विराटभवने स्त्रियः ॥[13] इति ।

इत्थं नृत्यसम्बद्धाः बहवः प्रसङ्गाः महाभारते रामायणे च उपलभ्यन्ते ।

### ३. पुराणेषु नाट्यस्योल्लेखः

- पुराणेषु अप्सरसां नर्तनस्य प्रस्तावः बहुत्र दृश्यते । उदाहरणार्थं भागवतपुराणे समुद्रमथनसन्दर्भे उच्चैःश्रवसः, ऐरावतस्य, कौस्तुभमणेश्च विनिर्गमनादनन्तरं लक्ष्मीदेव्या आविर्भाव उक्तः । तदा गन्धर्वाणां गायनस्य अप्सरसां नर्तनस्य विषय उक्तः । तदेवम् –

ऋषयः कल्पयाञ्चक्रुरभिषेकं यथाविधि ।
जगुर्भद्राणि गन्धर्वा नट्यश्च ननृतुर्जगुः ॥[14] इति ।

- पुनः गरुडपुराणे आचारकाण्डे सूर्यादीनां प्रमाणवर्णनसन्दर्भे, सूर्यास्तमनकाले अप्सरसः नृत्यन्तीत्युक्तः । तदेवम् –

नृत्यन्त्यप्सरसो यान्ति सूर्यस्यानुनिशाचराः ।
वहन्ति पन्नगा यक्षैः क्रियतेऽभीषु[15] सङ्ग्रहः ॥[16] इति ।

- भागवतपुराणस्यैव दशमस्कन्धे कृष्णस्य लीलानां वर्णनसन्दर्भे प्रसिद्धः कालियमर्दनप्रसङ्गः उक्तः । तत्र कृष्णः महोरगस्य फणानामुपरि नृत्यं करोति । गन्धर्वाः सिद्धाः चारणाः सुराः सुरनार्यश्च गीतं वाद्यञ्चाकुर्वन्निति विवृतम् ।

**तद्यथा –**

एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरः स्वधिरूढ आद्यः।
तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽखिलकलादिगुरुर्ननर्त ॥
तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगन्धर्वसिद्धसुरचारणदेववध्वः ।
प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥[17] इति ।

- देवीभागवते प्रथमस्कन्धे ब्रह्मा देव्याः स्तुतिं करोति । तत्सन्दर्भे सः देवीं प्रति त्वं विविधप्रकारं नाट्यं तनोषि इति तस्याः लीलां वर्णयति । तदेवम् –

नाट्यं तनोषि सुगुणा त्रिगुणा विविधप्रकारम् ।
नो वेत्ति कोऽपि तव कृत्यविधानयोगम् ॥[18] इति ॥
अत्र नाट्यशब्दो भगवत्याः लीलानाटकम् इति भावे उक्तः।

- गरुडपुराणे आचाराध्याये प्रासादलक्षणविवरणसन्दर्भे देवताप्रासादे नाट्यशालायाः निर्माणस्यावश्यकता उक्ता । तदेवम् –

नाट्यशाला च कर्तव्या द्वारदेश समाश्रया ।
प्रासादे देवतानाञ्च कार्या दिक्षु विदिक्ष्वपि ॥[19] इति ।

- नरनारायणयोः तपोभङ्गं कर्तुम् अप्सरसः वसन्तश्च इन्द्रेण प्रेषिताः । तत्र ताः अप्सरसः गीतवाद्यनर्तनैः मुन्योस्तपोभङ्गं कर्तुं प्रयत्नमकुर्वन्निति स्कन्धपुराणे उक्तः । तदेवम् –

जगौ मनोहरं काचिन्ननर्त तत्र चाप्सराः ।
अवदयत्तथैवान्या मनोहरतरं नृप ॥
हावैर्भावैः नृत्तैर्हास्यैस्तथान्या वल्गुभाषितैः ।
तयोः क्षोभाय तन्वङ्ग्यश्चक्रुरुद्यममङ्गनाः ॥[20]इति ।
विश्वामित्रस्य तपोभङ्गाय मेनका नर्तनञ्चकारेति कथा अत्र स्मरणीया ।

- स्कन्धपुराणे रेवाखण्डे सत्यनारायणवृतस्य विधिकथनसन्दर्भे, वृतस्य समाप्त्यनन्तरं प्रसादं भक्षयित्वा नृत्यगीतादिभिः कालयापनं करणीयमित्युक्तम् । तदेवम् –

ततश्च बन्धुभिः सार्द्धं विप्रेभ्यः प्रतिपादयन् ।
प्रसादं भक्षयेद्भक्त्या नृत्यगीतादिकं चरेत् ॥[21]इति ।

- गरुडपुराणे तु माहेश्वरीपूजाविधेः विवरणसन्दर्भे नृत्यम् उपचारेषु अन्यतमम् इत्युक्तम् ।
तदेवम् –

[13] महाभारतम्-विराटपर्व-अ२-श्लो२४

[14] भागवतपुराणम्,स्कन्धः-८, अध्या-८, श्लो-१२ ।

[15] अभीषु - अभि+इष+कु, किरणे, प्रग्रहे । इति वाचस्पत्ये ।

[16] गरुडपुराणम्. आचारकाण्डः अ-५८ श्लो-२१ । अभीषु-किरणानि ।

[17] भागवतपुराणम्. १० स्कन्धः, १६ अध्यायः, २६,२७ श्लोकौ ।

[18] देवीभागवतम् -१-७-३०

[19] गरुडपुराणम्- आचाराध्यायः अ-४७ श्लो-४५ ।

[20] स्कन्धपुराणम् रेवाखण्डः अ-१६२ श्लो २९,३० ।

[21] स्कन्धपुराणम् रेवाखण्डे अ-२३३ श्लो-२१ ।

पाद्यार्घ्याचमनं गन्धं ताम्बूलं गीतवादनम् ।
नृत्यं छत्रादिकरणं मुद्राणां दर्शनं तथा ॥[22]इति ।

एवं नृत्यनाट्यसम्बद्धाः बहवः प्रसङ्गाः पुराणोपपुराणेषु उपलभ्यन्ते ।

४. शास्त्रेषु नाट्यस्योल्लेखः

- व्याकरणस्यादावेव माहेश्वरसूत्रारम्भे प्रसिद्धः श्लोकः पठ्यते ।

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम् ॥[23] इति॥

अयं श्लोकः पुराणेषूक्तस्य शिवस्य ताण्डवस्य उल्लेखं करोति । आष्टाध्याय्यामपि नटसूत्रस्योल्लेखः एवं दृश्यते – "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः"[24] अस्यार्थः – तृतीयासमर्थाभ्यां पाराशर्यशिलालिभ्यां प्रातिपदिकाभ्यां यथासङ्ख्यं भिक्षुनटसूत्रयोः प्रोक्तयोर्णिनिः प्रत्ययः भवति । पाराशर्येण प्रोक्तमधीयते – पाराशरिणो भिक्षवः । शिलालिना प्रोक्तमधीयते – शैलालिनो नटाः । अग्रिमं सूत्रं "कर्मन्दकृशाश्वादीनिः"[25] इति । अस्यार्थः – तृतीयासमर्थाभ्यां कर्मन्दकृशाश्व-प्रातिपदिकाभ्यां यथासङ्ख्यं भिक्षुनटसूत्रयोः प्रोक्तयोरिनिः प्रत्ययो भवति । तद्यथा कर्मन्देन प्रोक्तमधीयते – कर्मन्दिनः भिक्षवः । कृशाश्वेन प्रोक्तमधीयते कृशाश्विनो नटाः । अत्रेदमवगन्तव्यम् – "छन्दोब्राह्मणानि च तद्विषयाणि"[26] इति सूत्रानुसारेण प्रोक्तप्रत्ययान्तानि छन्दांसि ब्राह्मणानि च तद्विषयाण्येव (अध्येतृ-वेदितृविषयाण्येव) भवन्तीत्युक्तम् । उपर्युक्तसूत्रद्वये भिक्षुनटसूत्राभ्यां छन्दोवत् मान्यता दीयते पाणिनिना । पुनः पाणिनीये "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः[27]" इति सूत्रे छान्दोग्यम्, औक्थिक्यं, याज्ञिकं, बाह्वृचम् इत्यादिना सह नाट्यशब्दस्य ञ्यः प्रत्ययः उक्तः । अतः पाणिनिमुनेः काले नटसूत्राणां वेदतुल्यगौरवमासीदिति वक्तुं शक्नुमः ।

[22] गरुडपुराणम्. आचाराध्यायः -४०, श्लो-११८ ।

[23] नन्दिकेश्वरकाशिका इति व्याकरणग्रन्थः नन्दिकेश्वरप्रोक्तः इति कथ्यते । तत्र मङ्गलश्लोकरूपेण अयमेव श्लोकः वर्तते ।

[24] पाणिनीयसूत्रम्-४-३-११॥

[25] पाणिनीयसूत्रम् -४-३-१११।

[26] पाणिनीयसूत्रम् -४-२-६६ ।

[27] पाणिनीयसूत्रम् -४-३-१२८

- कौटिलीये अर्थशास्त्रे विनयाधिकरणाख्ये प्रथमाधिकरणे गूढपुरुषप्रणिधिप्रकरणे एवमुक्तम् –

"सूदरालिकस्नापकसंवाहकास्तरककल्पकप्रसादकोधकपैचारकारसदाः कुब्जवामन-किरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः। "

अनेन ज्ञायते यत् तत्काले गूढकार्येष्वपि नटनर्तकान् आयोजयन्ति स्मेति ।

पुनः अध्यक्षप्रचारेति द्वितीयाधिकरणे प्रथमेऽध्याये –

"न च तत्रारामाः विहारार्थाः शालाः स्युः । नटनर्तनगायनवादकवाग्जीवन-कुशीलवाः वा कर्मविघ्नं कुर्युः । निराश्रयत्वात् ग्रामाणां क्षेत्राभिरतत्वाच्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति ।" इत्युक्तम् ।

पुनः सप्तमे षाड्गुण्याधिकरणे सन्धिकर्मसन्धिमोक्ष-प्रकरणे बद्धः राजकुमारः कथं बहिरानेतव्य इति व्याख्याति । तत्सन्दर्भे नटनर्तकगायकाः साहाय्यं कुर्युरिति वदति । तदेवम् –

"नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिका वा पूर्वप्रणिहिताः परमुपतिष्ठेरन् । ते कुमारं परम्परयोपतिष्ठेरन् । तेषामनियतकाल-प्रवेशस्थाननिर्गमनानि स्थापयेत् । ततस्तद्व्यञ्जनो वा रात्रौ प्रतिष्ठेत ।" इति ।

- **साङ्ख्यकारिकायामुक्तमेवम् –**

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥[28] इति ।

अत्र नर्तक्याः उदाहरणेन पुरुषप्रकृत्योः सम्बन्धः उक्तः ईश्वरकृष्णेन ।

- **ज्योतिषशास्त्रे नृत्यारम्भ-नक्षत्राण्युक्तानि-**

मित्रार्कध्रुववासवाम्बुपमघातोयान्त्यपुष्येन्दुभिः ।
पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वा भृगौ खे विधौ ॥
आप्ये सर्वजलाशयस्य खननं व्यम्भो मघैः सेन्द्रभैः ।
तैर्नृत्यं हिबुके शुभे तनुगृहे ज्ञेऽब्जे ज्ञराशौ शुभम् ॥[29]इति ।

अस्मिन् श्लोके जलाशयस्य निर्माणस्य तथा नृत्यारम्भस्य च मुहूर्तमुक्तम् । "अनुराधा, हस्ता, ध्रुवा, धनिष्ठा, शतभिषा, ज्येष्ठा, पूर्वाषाढ, रेवती, पुष्य, मृगशिरा एतेषु नक्षत्रेषु, तथा लग्नात् चतुर्थे शुभग्रहे, लग्ने वर्तमाने बुधे, बुधस्य राश्योः

[28] साङ्ख्यकारिका. श्लो-५९

[29] मु.चि.-नक्षत्रप्रकरणम्-श्लो२५

कन्यामिथुनयोः चन्द्रे वर्तमाने नृत्यारम्भः प्रशस्तः" इत्यस्यार्थः[30]।

- वात्सायनप्रणीते कामसूत्रे वैशिकनाम्नः षष्ठे अधिकरणे प्रथमे अध्याये वैश्याङ्गनानां पुरुषाधिगमविचारे रतिक्रीडार्थं पुरुषाणाम् आह्वानकरणार्थं कलागोष्ठीः योजयेदित्युक्तम्। तदेवम् –

ताम्बूलानि स्रजश्चैव संस्कृतं चानुलेपनम्।
आगतस्याहरेत्प्रीत्या कलागोष्ठीश्च[31] योजयेत् ॥[32] इति।

एवं प्राचीनानाम् अर्वाचीनानाञ्च शास्त्रकाराणां प्रवृत्तिः प्रसक्तिश्च नाट्यकलासु आस्तामिति वक्तुं शक्नुमः।

## ग्रन्थसूची


१. अथर्ववेदसंहिता - चौकाम्बा संस्कृत प्रतिष्ठानम् – २००९
२. ऋग्वेदसंहिता - चौकाम्बा संस्कृत प्रतिष्ठानम् – २००९
३. गरुडपुराणम् - सं- पण्डितरामतेजपाण्डेयः - चौकाम्बा विद्याभवनं वारणसी – १९८६
४. देवीभागवतम् – रामतेजपाण्डेयः – अज्ञातप्रकाशनम् - १९८६
५. मुहूर्तचिन्तामणिः – रामदैवज्ञः - चौकाम्बासुरभारती प्रकशन वारणसी – २०००
६. वाजसनेयि माध्यन्दिन शुक्लयजुर्वेद संहिता - सं- पण्डित जगदीशलाल शास्त्री - मोतीलाल बनारसीदास पब्लिकेशन्स् -१९९९
७. अष्टाध्यायी-भाष्य-प्रथवृत्तिः ४-भागाः - सं - ब्रह्मदत्त जि जिज्ञासु - रामलाल कपूर ट्रस्ट – २०११
८. कामसूत्रम् जयमङ्गलाटीकायुतम् - वात्सायनः, यशोधरः - निर्णयसागरमुद्रणालयः मुम्बयी – १९००
९. महाभारतम्, हिन्दी-अनुवादयुतम् ६-खण्डाः - पण्डितरामनारायणदत्त शास्त्री पाण्डेय - गीता प्रेस् – १९६४
१०. रामयाणम् - गीता प्रेस् – २०००


---

[30] शब्दकल्पद्रुमेऽपि अनुराधा धनिष्ठा पुष्यः हस्ता चित्रा स्वाती ज्येष्ठा शतभिषा रेवतीति नवनक्षत्राणि नाट्यारम्भनक्षत्राणीत्युक्तानि।

[31] अत्र कलागोष्ठीन् इत्यत्र नृत्यगीतादिकमेव यतो हि जयमङ्गलाटीकाकारः च शब्देन काव्यगोष्ठीन् इति व्याख्याति। चित्रलेखनादीनि अत्र न युज्यते इत्यतः कलागोष्ठीन् इति शब्देन गीतवाद्यनृत्यादिकमेव इति ममाभिप्रायः।

[32] कामसूत्रम् – ६/१/३१।